पारिप्लवं, त्रि, ( परि+प्लु+अच् । ततः प्रज्ञाद्यण् । ) चञ्चलम् । इत्यमरः ।३।१।७५॥ (यथा, रघुः । ३ । ११ ।

"तयोपचाराञ्जलिखिन्नहस्तया
ननन्द पारिप्लवनेत्रया नृपः ॥" )

आकुलः । इति मेदिनी । वे,६०॥ (क्ली, तीर्थविशेषः । यथा, महाभारते । ३ । ८३ । १२ ।

"ततः पारिप्लवं गच्छेत्तीर्थं त्रैलोक्यविश्रुतम् ।
अग्निष्टोमातिरात्राभ्यां फलं प्राप्नोति भारत ॥"

पुं, जलपक्षी । इति रामानुजः ॥ यथा, रामायणे । ४ । २७ । २३ ।

"पारिप्लवशतैर्जुष्टा बर्हिक्रौञ्चविनादिता ।
रमणीया नदी सौम्या मुनिसङ्घनिषेविता ॥"

पञ्चममन्वन्तरीयप्रकृतिविशेषः । यथा, हरिवंशे । ७ । २७ ।

"देवाश्चाभूतरजसस्तथा प्रकृतयोऽपरे ।
पारिप्लवश्च रैभ्यश्च मनोरन्तरमुच्यते ॥" )

पारिभद्रः, पुं, ( परितो भद्रमस्मात् । परिभद्रस्ततः प्रज्ञाद्यण् । ) वृक्षविशेषः । पालितामादार इति भाषा ॥ तत्पर्य्यायः । निम्बतरुः २ मन्दारः३ पारिजातकः ४ । इत्यमरः ।२।४।२९॥ रक्तकुसुमः५ कृमिघ्नः६ बहुपुष्पः७ रक्तकेसरः८ इति राजनिर्घण्टः ॥ अस्य गुणः । अनिलश्लेष्मशोथमेदःकृमिनाशित्वम् । अस्य पुष्पगुणः । पित्तरोगकर्णव्याधिनाशित्वम् । इति भावप्रकाशः ॥ देवदारु । इति मेदिनी ॥ सरलवृक्षः । इति शब्दचन्द्रिका ॥ ( यज्ञवाहस्य पुत्रविशेषः । शल्मद्वीपस्य वर्षविशेषः । यथा, भागवते । ५ । २० । ९ ।

"तद्द्वीपाधिपतिः प्रियव्रतात्मजो यज्ञवाहः स्वसुतेभ्यस्तन्नामानि सप्त वर्षाणि व्यभजत् । सुरोचनं सौमनस्यं रमणकं देववर्हं पारिभद्रमाप्यायनमभिज्ञातमिति ॥" )

पारिभद्रकः, पुं, ( पारिभद्र एव । स्वार्थे कन् । ) देवदारुवृक्षः । इत्यमरः ॥ (यथा, महाभारते । १ । १२५ । ३ ।

"पलाशैस्तिलकैर्निम्बैश्चम्पकैः पारिभद्रकैः ॥" )

निम्बवृक्षः । कुष्ठौषधे, क्ली । इति राजनिर्घण्टः ॥

पारिभाव्यं, क्ली, ( परिभवाय रोगादिनाशाय हितम् । परिभव+ष्यञ् ।) कुष्ठौषधम् । इत्यमरः ।२।४।१२९॥ परिभुवो भावः । जामिनी इति भाषा ॥ यथा,—

"साक्षित्वं पारिभाव्यञ्च दानं ग्रहणमेव च ।
विभक्ता भ्रातरः कुर्य्युर्नाविभक्ताः परस्परम् ॥"
इति दायभागः ॥

पारिभाषिकं, क्ली, ( परिभाषात आगतम् । परिभाषा+ठञ् । ) परिभाषयार्थबोधकं पदम् । यथा तत्राधुनिकसङ्केतः परिभाषा तया अर्थबोधकं पदं पारिभाषिकम् । यथा शास्त्रकारादिसङ्केतितनदीवृद्ध्यादिपदम् । इति शक्तिवादे गदाधरः ॥

पारिमाण्डल्यं, क्ली, ( परिमण्डलस्य परमाणोर्भावः । परिमण्डल+ष्यञ् । ) परमाणुपरिमाणम् । यथा, भाषापरिच्छेदे । १५ ।

"पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम् ॥"

पारिमुखिकः, त्रि, (परिमुखं वर्त्तते इति । "परिमुखञ्च ।" ४ । ४ । २९ । इति ठक् । ) परिमुखेण तिष्ठति यः । सम्मुखवर्त्ती । परिमुखशब्दात् ष्णिकप्रत्ययनिष्पन्नः ॥

पारियात्रः, पुं, (परितो यात्रया दृश्यते । "शेषे ।" ४।२।९२ । इत्यण् । ) पारियात्रपर्व्वतः । इति शब्दरत्नावली ॥ (यथा, गोलाध्याये । ३ । ४२ ।

"माहेन्द्रशुक्तिमलयर्क्षकपारियात्राः
सह्यः सविन्ध्य इह सप्तकुलाचलाख्याः ॥")

पारियात्रिकः, पुं, ( पारियात्र एव । स्वार्थे ठक् ।) पारियात्रः । इति हेमचन्द्रः । ४ । ९७ ॥

पारियानिकः, पुं, ( परियानं प्रयोजनमस्य । परियान+ठञ् । ) अध्वरथः । इति हेमचन्द्रः । ३ । ४१६ ॥ परिधातिकोऽपि पाठः ॥

पारिरक्षकः, पुं, ( परिरक्षति आत्मानमिति । परि+रक्ष+ण्वुल् । ततः प्रज्ञाद्यण् । ) मस्करी । तापसः । इति हेमचन्द्रः । ३ । ४७४ ॥

पारिशः, पुं, वृक्षविशेषः । पलाशपिपुल इति गजहण्ड इति च भाषा ॥ तत्पर्य्यायः । फलीशः २ कपिचूतः ३ कमण्डलुः ४ गर्द्दभाण्डः ५ कन्दरालः ६ कपीतनः ७ सुपार्श्वकः ८ । अस्य गुणाः । दुर्जरत्वम् । स्निग्धत्वम् । कृमिशुक्रकफप्रदत्वम् । फले अम्लत्वम् । मूले मधुरत्वम् । कषायत्वम् । स्वादुमज्जकत्वञ्च । इति भावप्रकाशः ॥

पारिषदः, पुं, परिषदि तिष्ठति यः । ( परिषदि साधुः । परिषदो ण्यः इत्यत्र योगविभागात् णः । ) सभासद् । तत्पर्य्यायः । सभ्यः २ सभास्तारः ३ सभासत् ४ परिषद्बलः ५ पर्षद्बलः ६ पारिषद्यः ७ पार्षदः ८ । इति शब्दरत्नावली ॥ (यथा, महाभारते । २ । १० । ३२ ।

"शङ्कुकर्णमुखाः सर्व्वे दिव्याः पारिषदास्तथा ॥"

परिषद इदम् । "चत्वार्ध्यर्थपरिषदश्च ।" ४ । ३।१२३। इति अण् । ) परिषत्सम्बन्धिनि, त्रि ॥

पारिषद्यः, पुं, ( परिषदं समवैति । "परिषदो ण्यः ।" ४ । ४ । ४४ । इति ण्यः । ) पारिषदः । इति शब्दरत्नावली ॥

पारिहारिकः, त्रि, ( परिहारे साधुः । परिहार+ठञ् । ) परिहारकर्त्ता । परिहारं करोति यः इत्यर्थे ष्णिकप्रत्ययनिष्पन्नः ॥

पारिहार्य्यः, पुं, ( परिह्रियते इति । परि+हृ+ण्यत् । ततः प्रज्ञाद्यण् ।) वलयः । इत्यमरः ॥ परिहारत्वे, क्ली ॥

पारिहास्यं, क्ली, ( परिहास+ष्यञ् । ) परिहासस्य भावः । परिहासद्वारा कृतम् । यथा, श्रीभागवते । ६ । अजामिलोपाख्याने ।२।१४।

"साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव वा ।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः ॥"

"नन्वयं पुत्त्रनामाग्रहीत् न भगवन्नाम तत्राहुः । साङ्केत्यं पुत्त्रादौ सङ्केतितम् । पारिहास्यं परिहासेन कृतम् । स्तोभं गीतालापपूरणार्थं कृतम् । हेलनं किं विष्णुनेति सावज्ञमपि च वैकुण्ठनामोच्चारणम् ।" इति तट्टीकायां श्रीधरस्वामी ॥

पारी, स्त्री, ( पारयत्यनयेति । पॄ पूर्त्तौ+णिच्+घञ् । ततो ङीष् । ) पूरः । जलसमूहः । कर्कोरी । हस्तिपादरज्जुः । इति मेदिनी । रे,५६॥ पात्री । परागः । इति विश्वः ॥ (पीयतेऽनेति । पा+क्विप् । तद्राति । रा+कः । ङीष् । ) पानपात्रम् । इति त्रिकाण्डशेषः ॥ ( यथा, राजतरङ्गिण्याम् । ४ । ३७३ ।

"कर्पूरपारीपतितं मौरेयमिव हारितम् ॥")

दोहनपात्रम् । इति जटाधरः ॥

पारीक्षितः, पुं, परीक्षितराजः । इति शब्दरत्नावली ॥ जनमेजयः । परीक्षितोऽपत्यं इत्यर्थे ष्णप्रत्ययनिष्पन्नः ॥ ( यथा, देवीभागवते । २ । ११ । १२ ।

"ततः सुवर्णवर्म्माख्यो राजा काशीपतिः किल ।
वपुष्टमां शुभां कन्यां ददौ पारीक्षिताय च ॥")

पारीणः, त्रि, ( पारं गामीति । पार+"अवारपारात्यन्तानुकामं गामी ।" ५ । २ । ११ । इति खः । ) पारगमनकर्त्ता । पारं गच्छति इत्यर्थे खीनप्रत्ययनिष्पन्नः ॥ ( यथा, भट्टिः । २ । ४६ ।

"त्रिवर्गपारीणमसौ भवन्त-
मध्यासयन्नासनमेकमिन्द्रः ॥" )

पारीन्द्रः, पुं, ( पॄ पालने+कर्म्मणि इन् । पारिः पशुस्तस्य इन्द्रः ।) सिंहः । अजगरसर्पः । इति हेमचन्द्रः ॥

पारीरणः, पुं, ( पार्य्यां जलपूरे रणं यस्य । ) कमठः । दण्डः । पटशाटकः । इति विश्वः ॥

पारुः, पुं, ( पिबति रसानिति । पा+"बाहुलकात् पिबतेश्च । ४ । १०१ । इत्यत्र उज्ज्वलदत्तोक्त्या रुः । ) वह्निः । सूर्य्यः । इत्युणादिकोषः ॥

पारुष्यं, क्ली, ( परुषस्य भावः । परुष+ष्यञ् । ) अप्रियभाषणम् । तत्पर्य्यायः । अभिवादः २ । इत्यमरः । १ । ६ । १४ ॥ तत्तु चतुर्व्विधवाङ्मयपापान्तर्गतपापविशेषः । यथा,—

"पारुष्यमनृतञ्चैव पैशुन्यञ्चापि सर्व्वशः ।
असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् ॥"
इति तिथ्यादितत्त्वम् ॥

परुषत्वम् । दुर्व्वाक्यम् । इति मेदिनी । ये, ६४ ॥ इन्द्रस्य वनम् । इति विश्वः ॥ अगुरु । इति शब्दचन्द्रिका ॥

पारुष्यः, पुं, (परुषस्य भावः पारुष्यं दुर्व्वाक्यं तदिव नीतिवाक्यमस्ति अस्यास्मिन् वा इत्यच् ।) वृहस्पतिः । इति मेदिनी । ये, ६४ ।

पारेरकः, पुं, ( वध्यादेः पारमीर्त्ते गच्छतीति । ईर्+ण्वुल् । ) खड्गः । इति शब्दमाला ॥